नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते ॥
द्विलक्षे चोत्तरे ब्रह्मन् ! बुधो नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशना: स्थित: ॥
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थित: ।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहित: ॥
सौरिर्वृहस्पतेश्चोर्द्ध्वं द्विलक्षे समवस्थित: ॥”
इति विष्णुपुराणे । २ । ७ अध्याय: ॥

तेषां रथादि यथा,—
“योजनानां सहस्राणि भास्करस्य रथो नव ।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम ! ॥
सार्द्धकोटिस्तथा सप्तनियुतान्यधिकानि वै ।
योजनानान्तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम् ॥
चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो व्यवस्थित: ।
पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य महामते ॥
अक्षप्रमाणमुभयो: प्रमाणं तद्युगार्द्धयो: ।
ह्रस्वोऽक्षस्तद्युगार्द्धेन ध्रुवाधारो रथस्य वै ।
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले ॥
हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु ।
गायत्री च बृहत्युष्णिग्जगती त्रिष्टुबेव च ॥
अनुष्टुप् पंक्तिरित्युक्ताश्छन्दांसि हरयो रवे: ।
स रथोऽधिष्ठितो देवैरादित्यैरृषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसै: ॥
स्तुवन्ति मुनय: सूर्य्यं गन्धर्व्वैर्गीयते पुर: ।
नृत्यन्त्यप्सरसो यान्ति सूर्य्यस्याशु निशाचरा: ॥
वहन्ति पन्नगा यक्षै: क्रियते भीषु संग्रह: ।
वालखिल्यास्तथैवैनं परिवार्य्य समासते ॥
सोऽयं सप्तगण: सूर्य्यमण्डले मुनिसत्तम ! ।
हिमोष्णवारिवृष्टीनां हेतुत्वं समुपागत: ॥
रथस्त्रिचक्र: सोमस्य कुन्दाभास्तस्य वाजिन: ।
वामदक्षिणतो युक्ता दश तेन चरत्यसौ ॥ * ॥
वाय्वग्निद्रव्यसम्भूतो रथश्चन्द्रसुतस्य च ।
पिशङ्गैस्तुरगैर्युक्त: सोऽष्टाभिर्वायुवेगिभि: ॥*॥
सवरूथ: सानुकर्षो युक्तो भूसम्भवैर्हयै: ।
सोपासङ्गपताकस्तु शुक्रस्यापि रथो महान् ॥*॥
अष्टाश्व: काञ्चन: श्रीमान् भौमस्यापि रथो महान् ।
पद्मरागारुणैरश्वै: संयुक्तो वह्निसम्भवै: ॥ * ॥
अष्टाभि: पाण्डरैर्युक्तो वाजिभि: काञ्चने रथे ।
तस्मिंस्तिष्ठति वर्षं वै राशौ राशौ वृहस्पति: ॥
आकाशसम्भवैरश्वै: शबलै: स्यन्दनं युतम् ।
समारुह्य शनैर्याति मन्दगामी शनैश्चर: ॥ * ॥
स्वर्भानोस्तुरगा ह्यष्टौ भृङ्गाभा धूसरं रथम् ।
सकृद्युक्तास्तु मैत्रेय ! वहन्त्यविरतं सदा ॥*॥
तथा केतुरथस्याश्वा अष्टौ ते वातरंहस: ।
पलालधूमवर्णाभा लाक्षारसनिभारुणा: ॥ * ॥
एते मया ग्रहाणां वै तवाख्याता रथा नव ।
सर्व्वे ध्रुवे महाभाग ! प्रवद्धा वायुरश्मिभि: ॥”
इति विष्णुपुराणे २ अंशे ८।१०।१२ अध्याया: ॥

ग्रहाणामशुभप्रतीकार: । राजमार्त्तण्डे ।
“दोषो न स्याद्ग्रहाणामशिशिरकिरणे ताम्रमिन्दौ च शङ्खं
पृथ्वीपुत्त्रे प्रवालं शशधरतनये शातकुम्भं भुजेन ।
देवाचार्य्ये च मुक्तां मणिमसुरगुरौ सीसकं सूर्य्यसूनौ
राहौ लौहं त्वनिष्टे कमलजतनये राजपट्टं विभर्त्तु: ॥”
शातकुम्भं सुवर्णम् । राजपट्टं कर्पूरमणीति ख्यातम् । अपि च । बुद्धिप्रकाशे ।
“त्रिमूलीं क्षीरिकामूलं गोजिह्वां वृद्धदारकम् ।
ब्रह्मयष्टिं सिंहपुच्छीं वाघ्यालं चन्दनं सितम् ।
अश्वगन्धां क्रमात् सूर्य्याद्ग्रहदोषोपशान्तये ॥”
इति ज्योतिषतत्त्वम् ॥

स्वजन्मराश्यवधिनवग्रहशुद्धिर्यथा,—
“केतूपप्लवभौममन्दगतय: षष्ठास्त्रिसंस्था: शुभाश्चन्द्रार्कावपि ते च तौ च दशमौ चन्द्र: पुन: सप्तम: ।
जीव: सप्तनवद्विपञ्चमगतो युग्मेषु सौम्यात्मज:
शुक्र: षड्दशसप्तवर्ज्जमितरे सर्व्वेऽप्युपान्ते शुभा:॥”
इति दीपिका ॥

रवि: ३।६।१०।११राशय: । सोम: ३।६।७।१०।११ शुक्लपक्षे २।५।६ । जन्मर्क्षवर्ज्जितजन्मचन्द्र: शुभ: । मङ्गल: ३।६।१०।११ । बुध: २।४।६।८।१०।११।१२ । वृहस्पति: २।५।७।६।११ । शुक्र: १।२।३।४।५।८।६।११।१२ । शनि: ३।६।१०।११। राहु: ३।६।१०।११ । केतु: ३।६।१०।११राशय:॥

ग्रहाणां राशिभोगनिर्णय: । यथा,—
“रविर्म्मासं निशानाथ: सपाददिवसद्वयम् ।
पक्षत्रयं भूमिपुत्त्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशद्दिनं भृगु: ।
शनि: सार्द्धद्वयं वर्षं स्वर्भानु: सार्द्धवत्सरम् ॥”
रवि: १ मास: । सोम: २।० दिनम् । कुज: ४५ दिनम् । बुध: १८ दिनम् । वृहस्पति: १ वत्सर: । शुक्र: २८ दिनम् । शनि: २॥० वत्सर: । राहु: १॥० वत्सर: । केतु: १॥० वत्सर: । इति ज्योतिषम् ॥ * ॥ अथ चन्द्रादिषड्ग्रहाणामस्तोदयज्ञानम् । यथा,—
“अथोदयास्तमययो: परिज्ञानं प्रकीर्त्त्यते ।
दिवाकरकराक्रान्तमूर्त्तीनामल्पतेजसाम् ॥
सूर्य्यादभ्यधिका: पश्चादस्तं जीवकुजार्कजा: ।
ऊना: प्रागुदयं यान्ति शुक्रज्ञौ वक्रिणौ तथा ॥
ऊना विवस्वत: प्राच्यामस्तं चन्द्रज्ञभार्गवा: ।
व्रजन्त्यभ्यधिका: पश्चादुदयं शीघ्रयायिन: ॥”*॥
एषां कालांशा यथा,—
“एकादशामरेज्यस्य तिथिसंख्यार्कजस्य च ।
अस्तांशा भूमिपुत्त्रस्य दशसप्ताधिकास्तत: ॥
पश्चादस्तमयोऽष्टाभिरुदय: प्राङ्महत्तया ।
प्रागस्त उदय: पश्चादल्पत्वाद्दशभिर्भृगो: ॥
एवं बुधो द्वादशभिश्चतुर्द्दशभिरंशकै: ।
वक्रशीघ्रगती चार्कात् करोत्यस्तमयोदयौ ॥
एभ्याधिकै: कालभागैर्द्दृश्या न्यूनैरदर्शना: ।
भवन्ति लोके खचरा भानुभाग्रस्तमूर्त्तय: ॥”
इति सूर्य्यसिद्धान्त: ॥

तेषामस्तोदयदिनसंख्याज्ञानम् । यथा,—
“भुजाक्षिचन्द्रा-१२२ स्त्रिदशाश्च ३३ दन्ता ३२
वेदाचला ४७ रामकृते ४३ क्रमेण ।
भौमादिकस्यास्तदिनानि वक्रे
बुधस्य भूपा १६ दश भार्गवस्य ॥”
एषां एकस्मादस्तमयादुदयाद्वा अभ्युदयास्तज्ञानम् । यथा,—
“तथास्तवक्रात् कुजतोऽस्तवक्रे
जाक्ष-२२ ब्धि-४ विश्वे-१३ द्विंगि-१० नेश १२ मासै: ।
महास्तवक्रास्तविधी सितस्य
क्रमेण वक्रस्तु नवेन्दुमासै: १६ ॥”
गुरोरुदयस्य प्राक् पश्चात् शुक्रस्य तु उदयवक्रमहास्तानां प्राक् पश्चात् बाल्यवृद्धदिनज्ञानम् । यथा,—
“वृद्ध: पुरस्तादुदयस्य पश्चात्
बालश्च पक्षं १५ वचसां पति: स्यात् ।
एवं सित: पञ्चदिनानि वृद्धो
बालो भवेत्त्रीणि दिनानि वक्रे ॥
वृद्धस्तु पक्षं १५ भृगुजो महास्ते
बाल: पुनस्तत्र दशाहमेव ॥”
इति सिद्धान्तमञ्जरी ॥

अथ नवग्रहस्तोत्रम् ।
“जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम्
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
नमामि शशिनं भक्त्या शम्भोर्म्मुकुटभूषणम् ॥
धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम्
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सर्व्वगुणोपेतं नमामि शशिन: सुतम् ॥
देवतानामृषीणाञ्च गुरुं कनकसन्निभम् ।
वन्द्यभूतं त्रिलोकेशं तं नमामि वृहस्पतिम् ॥
हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥
नीलाञ्जनचयप्रख्यं रविसूनुं महाग्रहम् ।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
अर्द्धकायं महाघोरं चन्द्रादित्यविमर्द्दकम् ।
सिंहिकाया: सुतं रौद्रं तं राहुं प्रणमाम्यहम् ॥
पलालधूमसङ्काशं तारागृहविमर्द्दकम् ।
रौद्रं रुद्रात्मजं क्रूरं तं केतुं प्रणमाम्यहम् ॥
व्यासेनोक्तमिदं स्तोत्रं य: पठेत् प्रयत: शुचि: ।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशय: ॥
ऐश्वर्य्यमतुलञ्चापि आरोग्यं पुष्टिवर्द्धनम् ।
नरनारीप्रियत्वञ्च नित्यं तस्योपजायते ॥
तक्षकोऽग्निर्यमो वायुर्ये चान्ये ग्रहपीड़का: ।
ते सर्व्वे प्रशमं यान्ति व्यासो ब्रूयान्न संशय: ॥”
इति श्रीव्यासभाषितं नवग्रहस्तोत्रं समाप्तम् ॥
(ग्रहाणामन्यद्विवरणन्तु ग्रहशब्दे द्रष्टव्यम् ॥*॥
नवं नूतनं ग्रहो ग्रहणं यस्येति विग्रहे नवग्रहे, त्रि । यथा, रामायणे । २ । ५८ । ३ ।
“वृद्धं परमसन्तप्तं नवग्रहमिव द्विपम् ॥”)